# वैयाकरणसिद्धान्तकौमुदी

## हलन्तनपुंसकलिङ्गप्रकरणम् (०२)

२८.०८.२०१२

# वकारान्ताः नपुंसकलिङ्गाः

- वकारान्तः नपुंसकलिङ्गः विमलदिव् शब्दः ।
- ‘दिव उत्’ (६.१.१३१)
- अहर्विमलद्यु ।

- अन्तर्वर्तिनीं विभक्तिम् आश्रित्य पूर्वपदस्य इव उत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम् ‘उत्तरपदत्वे चापदादिविधौ प्रतिषेधः’ (वा) इति प्रत्ययलक्षणं न ।

- विमलदिवी, विमलदिवि ।

- अपदादिविधौ किम्?
- दधिसेचौ ।
- इह षत्वनिषेधे कर्तव्ये पदत्वम् अस्त्येव ।
- 'सात्पदाद्योः' (८.३.१११) इति षत्वनिषेधः ।
- चकारस्य कुत्वे तु न ।

# रेफान्ताः नपुंसकलिङ्गाः

- रेफान्तः नपुंसकलिङ्गः वार् शब्दः ।
- वाः, वारी ।
- अझलन्तत्वात् न नुम्, वारि ।

- रेफान्तः नपुंसकलिङ्गः चतुर् शब्दः ।
- नित्यं बहुवचनान्तः ।
- 'चतुरनडुहोः..' (७.१.९८) इति आमागमः ।
- चत्वारि ।

# मकारान्ताः नपुंसकलिङ्गाः

- मकारान्तः नपुंसकलिङ्गः किम् शब्दः ।
- 'न लुमताङ्गस्य' (१.१.६३) इति कादेशो न ।
- 'अङ्गस्य' (६.४.१ - ७.४.९७) इत्यधिकारे पठितं 'किमः कः' (७.२.१०३) इति सूत्रम् ।
- किम्, के, कानि ।

- मकारान्तः नपुंसकलिङ्गः इदम् शब्दः ।
- इदम्, इमे, इमानि ।

# अन्वादेशे नपुंसके एनद्वक्तव्यः (वा)

- इदं च अम्येव भवति ।
- तथा च भाष्ये 'एनदिति नपुंसकैकवचने वक्तव्यम्', इति पठित्वा, 'कुण्डमानय प्रक्षालयैनत्' इति उदाहृतम् ।
- औट्ऽऽशसोः टायाम् ओसि च 'द्वितीयाटौस्स्वेनः' इति एनादेश एव भवति ।
- एनत्, एने एनानि ।
- एनेन । एनयोः ।

# नकारान्ताः नपुंसकलिङ्गाः

- नकारान्तः नपुंसकलिङ्गः ‘ब्रह्मन्’ शब्दः ।
- वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः (अमरः) ।
- ब्रह्म
  - सोर्लुक्
- ब्रह्मणी
  - औङः शी, णत्वम्
- ब्रह्माणि
  - जसः शिः, उपधादीर्घः, णत्वम्

# सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः (वा)

- हे ब्रह्मन्, हे ब्रह्म ।

- ब्रह्मणा
- 'न संयोगाद्वमन्तात्' (६.४.१३७) इति निषेधाद् अल्लोपो न ।

- ब्रह्मभ्याम्
- 'नलोपः प्रातिपदिकान्तस्य' (८.२.७) इति नलोपः ।